মুনিরুবাচ
কথং নাম্নাং সহস্রং তং গণেশ উপদিষ্টবান ।
শিবদং তন্মমাচক্ষ লোকানুগ্রহতত্পর ।। ১ ।।
ব্রহ্মোবাচ
দেবঃ পূর্বং পুরারাতিঃ পুরত্রয়জয়োদ্যমে ।
অনর্চনাদ্গণেশস্য জাতো বিঘ্নাকুলঃ কিল ।। ২ ।।
মনসা স বিনির্ধার্য দদৃশে বিঘ্নকারণম ।
মহাগণপতিং ভক্ত্যা সমভ্যর্চ্য য়থাবিধি ।। ৩ ।।
বিঘ্নপ্রশমনোপায়মপৃচ্ছদপরিশ্রমম ।
সন্তুষ্টঃ পূজয়া শম্ভোর্মহাগণপতিঃ স্বয়ম ।। ৪ ।।
সর্ববিঘ্নপ্রশমনং সর্বকামফলপ্রদম ।
ততস্তস্মৈ স্বয়ং নাম্নাং সহস্রমিদমব্রবীত ।। ৫ ।।
অস্য শ্রীমহাগণপতিসহস্রনামস্তোত্রমালামন্ত্রস্য ।
গণেশ ঋষিঃ, মহাগণপতির্দেবতা, নানাবিধানিচ্ছন্দাংসি ।
হুমিতি বীজম, তুন্গমিতি শক্তিঃ, স্বাহাশক্তিরিতি কীলকম ।
সকলবিঘ্নবিনাশনদ্বারা শ্রীমহাগণপতিপ্রসাদসিদ্ধ্যর্থে জপে বিনিয়োগঃ ।
অথ করন্যাসঃ
গণেশ্বরো গণক্রীড ইত্যন্গুষ্ঠাভ্যাং নমঃ ।
কুমারগুরুরীশান ইতি তর্জনীভ্যাং নমঃ ।।
ব্রহ্মাণ্ডকুম্ভশ্চিদ্ব্যোমেতি মধ্যমাভ্যাং নমঃ ।
রক্তো রক্তাম্বরধর ইত্যনামিকাভ্যাং নমঃ
সর্বসদ্গুরুসংসেব্য ইতি কনিষ্ঠিকাভ্যাং নমঃ ।
লুপ্তবিঘ্নঃ স্বভক্তানামিতি করতলকরপৃষ্ঠাভ্যাং নমঃ ।।
অথ অংগন্যাসঃ
ছন্দশ্ছন্দোদ্ভব ইতি হৃদয়ায় নমঃ ।

নিষ্কলো নির্মল ইতি শিরসে স্বাহা ।
সৃষ্টিস্থিতিলয়ক্রীড ইতি শিখায়ৈ বষট ।
গ্নয়ানং বিগ্নয়ানমানন্দ ইতি কবচায় হুম ।
অষ্টান্গযোগফলভৃদিতি নেত্রত্রয়ায় বৌষট ।
অনন্তশক্তিসহিত ইত্য়স্ত্রায় ফট ।
ভূর্ভুবঃ স্বরোম ইতি দিগ্বন্ধঃ ।
অথ ধ্যানম
গজবদনমচিন্ত্য়ং তীক্ষ্ণদংষ্ট্রং ত্রিনেত্রং
বৃহদুদরমশেষং ভূতিরাজং পুরাণম ।
অমরবরসুপূজ্য়ং রক্তবর্ণং সুরেশং
পশুপতিসুতমীশং বিঘ্নরাজং নমামি ।।
শ্রীগণপতিরুবাচ
ওং গণেশ্বরো গণক্রীডো গণনাথো গণাধিপঃ ।
একদন্তো বক্রতুণ্ডো গজবক্ত্রো মহোদরঃ ।। ১ ।।
লম্বোদরো ধূম্রবর্ণো বিকটো বিঘ্ননাশনঃ ।
সুমুখো দুর্মুখো বুদ্ধো বিঘ্নরাজো গজাননঃ ।। ২ ।।
ভীমঃ প্রমোদ আমোদঃ সুরানন্দো মদোত্কটঃ ।
হেরম্বঃ শম্বরঃ শম্ভুর্লম্বকর্ণো মহাবলঃ ।। ৩ ।।
নন্দনো লম্পটো ভীমো মেঘনাদো গণন্জয়ঃ ।
বিনায়কো বিরূপাক্ষো বীরঃ শূরবরপ্রদঃ ।। ৪ ।।
মহাগণপতির্বুদ্ধিপ্রিয়ঃ ক্ষিপ্রপ্রসাদনঃ ।
রুদ্রপ্রিয়ো গণাধ্যক্ষ উমাপুত্রোঘনাশনঃ ।। ৫ ।।
কুমারগুরুরীশানপুত্রো মূষকবাহনঃ ।
সিদ্ধিপ্রিয়ঃ সিদ্ধিপতিঃ সিদ্ধঃ সিদ্ধিবিনায়কঃ ।। ৬ ।।
অবিঘ্নস্তুম্বুরুঃ সিংহবাহনো মোহিনীপ্রিয়ঃ ।

www.yousigma.com

কটঙ্কটো রাজপুত্রঃ শাকলঃ সংমিতোমিতঃ ।। ৭ ।।
কূষ্মাণ্ডসামসম্ভূতির্দুর্জয়ো ধূর্জয়ো জয়ঃ ।
ভূপতির্ভুবনপতির্ভূতানাং পতিরব্যয়ঃ ।। ৮ ।।
বিশ্বকর্তা বিশ্বমুখো বিশ্বরূপো নিধির্গুণঃ ।
কবিঃ কবীনামৃষভো ব্রহ্মণ্যো ব্রহ্মবিত্প্রিয়ঃ ।। ৯ ।।
জ্যেষ্ঠরাজো নিধিপতির্নিধিপ্রিয়পতিপ্রিয়ঃ ।
হিরণ্ময়পুরান্তঃস্থঃ সূর্যমণ্ডলমধ্যগঃ ।। ১০ ।।
করাহতিধ্বস্তসিন্ধুসলিলঃ পূষদন্তভিত ।
উমাঙ্ককেলিকুতুকী মুক্তিদঃ কুলপাবনঃ ।। ১১ ।।
কিরীটী কুণ্ডলী হারী বনমালী মনোময়ঃ ।
বৈমুখ্যহতদৈত্যশ্রীঃ পাদাহতিজিতক্ষিতিঃ ।। ১২ ।।
সদ্যোজাতঃ স্বর্ণমুঞ্জমেখলী দুর্নিমিত্তহৃত ।
দুঃস্বপ্নহৃত্প্রসহনো গুণী নাদপ্রতিষ্ঠিতঃ ।। ১৩ ।।
সুরূপঃ সর্বনেত্রাধিবাসো বীরাসনাশ্রয়ঃ ।
পীতাম্বরঃ খণ্ডরদঃ খণ্ডবৈশাখসংস্থিতঃ ।। ১৪ ।।
চিত্রাঙ্গঃ শ্যামদশনো ভালচন্দ্রো হবির্ভুজঃ ।
যোগাধিপস্তারকস্থঃ পুরুষো গজকর্ণকঃ ।। ১৫ ।।
গণাধিরাজো বিজয়ঃ স্থিরো গজপতিধ্বজী ।
দেবদেবঃ স্মরঃ প্রাণদীপকো বায়ুকীলকঃ ।। ১৬ ।।
বিপশ্চিদ্বরদো নাদো নাদভিন্নমহাচলঃ ।
বরাহরদনো মৃত্যুঞ্জয়ো ব্যাঘ্রাজিনাম্বরঃ ।। ১৭ ।।
ইচ্ছাশক্তিভবো দেবত্রাতা দৈত্যবিমর্দনঃ ।
শম্ভুবক্ত্রোদ্ভবঃ শম্ভুকোপহা শম্ভুহাস্যভূঃ ।। ১৮ ।।
শম্ভুতেজাঃ শিবাশোকহারী গৌরীসুখাবহঃ ।
উমাঙ্গমলজো গৌরীতেজোভূঃ স্বর্ধুনীভবঃ ।। ১৯ ।।

য়গ্নয়কায়ো মহানাদো গিরিবর্ষ্মা শুভাননঃ ।
সর্বাত্মা সর্বদেবাত্মা ব্রহ্মমূর্ধা ককুপ্শ্রুতিঃ ।। ২০ ।।
ব্রহ্মাণ্ডকুম্ভশ্চিদ্ব্যোমভালঃসত্যশিরোরুহঃ ।
জগজ্জন্মলয়োন্মেষনিমেষোগ্নয়র্কসোমদৃক ।। ২১ ।।
গিরীন্দ্রৈকরদো ধর্মাধর্মোষ্ঠঃ সামবৃংহিতঃ ।
গ্রহর্ক্ষদশনো বাণীজিহ্বো বাসবনাসিকঃ ।। ২২ ।।
ভ্রূমধ্যসংস্থিতকরো ব্রহ্মবিদ্যামদোদকঃ ।
কুলাচলাংসঃ সোমার্কঘণ্টো রুদ্রশিরোধরঃ ।। ২৩ ।।
নদীনদভুজঃ সর্পাঙ্গুলীকস্তারকানখঃ ।
ব্যোমনাভিঃ শ্রীহৃদয়ো মেরুপৃষ্ঠোর্ণবোদরঃ ।। ২৪ ।।
কুক্ষিস্থয়ক্ষগন্ধর্বরক্ষঃকিন্নরমানুষঃ ।
পৃথ্বীকটিঃ সৃষ্টিলিঙ্গঃ শৈলোরুর্দস্রজানুকঃ ।। ২৫ ।।
পাতালজঙ্ঘো মুনিপাত্কালাঙ্গুষ্ঠস্ত্রয়ীতনুঃ ।
জ্যোতির্মণ্ডললাঙ্গূলো হৃদয়ালাননিশ্চলঃ ।। ২৬ ।।
হৃত্পদ্মকর্ণিকাশালী বিয়ত্কেলিসরোবরঃ ।
সদ্ভক্তধ্যাননিগডঃ পূজাবারিনিবারিতঃ ।। ২৭ ।।
প্রতাপী কাশ্যপো মন্তা গণকো বিষ্টপী বলী ।
য়শস্বী ধার্মিকো জেতা প্রথমঃ প্রমথেশ্বরঃ ।। ২৮ ।।
চিন্তামণির্দ্বীপপতিঃ কল্পদ্রুমবনালয়ঃ ।
রত্নমণ্ডপমধ্যস্থো রত্নসিংহাসনাশ্রয়ঃ ।। ২৯ ।।
তীব্রাশিরোদ্ধৃতপদো জ্বালিনীমৌলিলালিতঃ ।
নন্দানন্দিতপীঠশ্রীর্ভোগদো ভূষিতাসনঃ ।। ৩০ ।।
সকামদায়িনীপীঠঃ স্ফুরদুগ্রাসনাশ্রয়ঃ ।
তেজোবতীশিরোরত্নং সত্যানিত্যাবতংসিতঃ ।। ৩১ ।।
সবিঘ্ননাশিনীপীঠঃ সর্বশক্ত্যম্বুজালয়ঃ ।

লিপিপদ্মাসনাধারো বহ্নিধামত্রয়ালয়ঃ ।। ৩২ ।।
উন্নতপ্রপদো গূঢগুল্ফঃ সংবৃতপার্ষ্ণিকঃ ।
পীনজন্ঘঃ শ্লিষ্টজানুঃ স্থূলোরুঃ প্রোন্নমত্কটিঃ ।। ৩৩ ।।
নিম্ননাভিঃ স্থূলকুক্ষিঃ পীনবক্ষা বৃহদ্ভুজঃ ।
পীনস্কন্ধঃ কম্বুকণ্ঠো লম্বোষ্ঠো লম্বনাসিকঃ ।। ৩৪ ।।
ভগ্নবামরদস্তুন্গসব্যদন্তো মহাহনুঃ ।
হ্রস্বনেত্রত্রয়ঃ শূর্পকর্ণো নিবিডমস্তকঃ ।। ৩৫ ।।
স্তবকাকারকুম্ভাগ্রো রত্নমৌলির্নিরন্কুশঃ ।
সর্পহারকটীসূত্রঃ সর্পয়ন্ণ্যোপবীতবান ।। ৩৬ ।।
সর্পকোটীরকটকঃ সর্পগ্রৈবেয়কান্গদঃ ।
সর্পকক্ষোদরাবন্ধঃ সর্পরাজোত্তরচ্ছদঃ ।। ৩৭ ।।
রক্তো রক্তাম্বরধরো রক্তমালাবিভূষণঃ ।
রক্তেক্ষনো রক্তকরো রক্ততাল্বোষ্ঠপল্লবঃ ।। ৩৮ ।।
শ্বেতঃ শ্বেতাম্বরধরঃ শ্বেতমালাবিভূষণঃ ।
শ্বেতাতপত্ররুচিরঃ শ্বেতচামরবীজিতঃ ।। ৩৯ ।।
সর্বাবয়বসম্পূর্ণঃ সর্বলক্ষণলক্ষিতঃ ।
সর্বাভরণশোভাঢ্যঃ সর্বশোভাসমন্বিতঃ ।। ৪০ ।।
সর্বমন্গলমান্গল্যঃ সর্বকারণকারণম ।
সর্বদেববরঃ শান্গী বীজপূরী গদাধরঃ ।। ৪১ ।।
শুভান্গো লোকসারন্গঃ সুতন্তুস্তন্তুবর্ধনঃ ।
কিরীটী কুণ্ডলী হারী বনমালী শুভান্গদঃ ।। ৪২ ।।
ইক্ষুচাপধরঃ শূলী চক্রপাণিঃ সরোজভৃত ।
পাশী ধৃতোত্পলঃ শালিমন্জরীভৃত্স্বদন্তভৃত ।। ৪৩ ।।
কল্পবল্লীধরো বিশ্বাভয়দৈককরো বশী ।
অক্ষমালাধরো ণ্যানমুদ্রাবান মুদ্গরায়ুধঃ ।। ৪৪ ।।

পূর্ণপাত্রী কম্বুধরো বিধৃতান্কুশমূলকঃ ।
করস্থাম্রফলশ্চূতকলিকাভৃত্কুঠারবান ।। ৪৫ ।।
পুষ্করস্থস্বর্ণঘটীপূর্ণরত্নাভিবর্ষকঃ ।
ভারতীসুন্দরীনাথো বিনায়করতিপ্রিয়ঃ ।। ৪৬ ।।
মহালক্ষ্মীপ্রিয়তমঃ সিদ্ধলক্ষ্মীমনোরমঃ ।
রমারমেশপূর্বান্গো দক্ষিণোমামহেশ্বরঃ ।। ৪৭ ।।
মহীবরাহবামান্গো রতিকন্দর্পপশ্চিমঃ ।
আমোদমোদজননঃ সপ্রমোদপ্রমোদনঃ ।। ৪৮ ।।
সংবর্ধিতমহাবৃদ্ধিরৃদ্ধিসিদ্ধিপ্রবর্ধনঃ ।
দন্তসৌমুখ্যসুমুখঃ কান্তিকন্দলিতাশ্রয়ঃ ।। ৪৯ ।।
মদনাবত্যাশ্রিতান্ঘ্রিঃ কৃতবৈমুখ্যদুর্মুখঃ ।
বিঘ্নসংপল্লবঃ পদ্মঃ সর্বোন্নতমদদ্রবঃ ।। ৫০ ।।
বিঘ্নকৃন্নিম্নচরণো দ্রাবিণীশক্তিসত্কৃতঃ ।
তীব্রাপ্রসন্ননয়নো জ্বালিনীপালিতৈকদৃক ।। ৫১ ।।
মোহিনীমোহনো ভোগদায়িনীকান্তিমণ্ডনঃ ।
কামিনীকান্তবক্ত্রশ্রীরধিষ্ঠিতবসুন্ধরঃ ।। ৫২ ।।
বসুধারামদোন্নাদো মহাশন্খনিধিপ্রিয়ঃ ।
নমদ্বসুমতীমালী মহাপদ্মনিধিঃ প্রভুঃ ।। ৫৩ ।।
সর্বসদ্গুরুসংসেব্যঃ শোচিষ্কেশহৃদাশ্রয়ঃ ।
ঈশানমূর্ধা দেবেন্দ্রশিখঃ পবননন্দনঃ ।। ৫৪ ।।
প্রত্যুগ্রনয়নো দিব্যো দিব্যাস্ত্রশতপর্বধৃক ।
ঐরাবতাদিসর্বাশাবারণো বারণপ্রিয়ঃ ।। ৫৫ ।।
বজ্রাদ্যস্ত্রপরীবারো গণচণ্ডসমাশ্রয়ঃ ।
জয়াজয়পরিকরো বিজয়াবিজয়াবহঃ ।। ৫৬ ।।
অজয়ার্চিতপাদাব্জো নিত্যানন্দবনস্থিতঃ ।

www.yousigma.com

বিলাসিনীকৃতোল্লাসঃ শৌণ্ডী সৌন্দর্য়মণ্ডিতঃ ।। ৫৭ ।।
অনন্তানন্তসুখদঃ সুমঙ্গলসুমঙ্গলঃ ।
জ্ঞানাশ্রয়ঃ ক্রিয়াধার ইচ্ছাশক্তিনিষেবিতঃ ।। ৫৮ ।।
সুভগাসংশ্রিতপদো ললিতাললিতাশ্রয়ঃ ।
কামিনীপালনঃ কামকামিনীকেলিলালিতঃ ।। ৫৯ ।।
সরস্বত্যাশ্রয়ো গৌরীনন্দনঃ শ্রীনিকেতনঃ ।
গুরুগুপ্তপদো বাচাসিদ্ধো বাগীশ্বরীপতিঃ ।। ৬০ ।।
নলিনীকামুকো বামারামো জ্যেষ্ঠামনোরমঃ ।
রৌদ্রীমুদ্রিতপাদাব্জো হুম্বীজস্তুঙ্গশক্তিকঃ ।। ৬১ ।।
বিশ্বাদিজননত্রাণঃ স্বাহাশক্তিঃ সকীলকঃ ।
অমৃতাব্ধিকৃতাবাসো মদঘূর্ণিতলোচনঃ ।। ৬২ ।।
উচ্ছিষ্টোচ্ছিষ্টগণকো গণেশো গণনায়কঃ ।
সার্বকালিকসংসিদ্ধির্নিত্যসেব্যো দিগম্বরঃ ।। ৬৩ ।।
অনপায়োনন্তদৃষ্টিরপ্রমেয়োজরামরঃ ।
অনাবিলোপ্রতিহতিরচ্যুতোমৃতমক্ষরঃ ।। ৬৪ ।।
অপ্রতর্ক্যোক্ষয়োজয়্যোনাধারোনাময়োমলঃ ।
অমেয়সিদ্ধিরদ্বৈতমঘোরোগ্নিসমাননঃ ।। ৬৫ ।।
অনাকারোব্ধিভূম্যগ্নিবলঘ্নোব্যক্তলক্ষণঃ ।
আধারপীঠমাধার আধারাধেয়বর্জিতঃ ।। ৬৬ ।।
আখুকেতন আশাপূরক আখুমহারথঃ ।
ইক্ষুসাগরমধ্যস্থ ইক্ষুভক্ষণলালসঃ ।। ৬৭ ।।
ইক্ষুচাপাতিরেকশ্রীরিক্ষুচাপনিষেবিতঃ ।
ইন্দ্রগোপসমানশ্রীরিন্দ্রনীলসমদ্যুতিঃ ।। ৬৮ ।।
ইন্দীবরদলশ্যাম ইন্দুমণ্ডলমণ্ডিতঃ ।
ইধ্মপ্রিয় ইডাভাগ ইডাবানিন্দিরাপ্রিয়ঃ ।। ৬৯ ।।

www.yousigma.com

ইক্ষাকুবিঘ্নবিধ্বংসী ইতিকর্তব্যতেপ্সিতঃ ।
ঈশানমৌলিরীশান ঈশানপ্রিয় ঈতিহা ।। ৭০ ।।
ঈষণাত্রয়কল্পান্ত ঈহামাত্রবিবর্জিতঃ ।
উপেন্দ্র উডুভৃন্মৌলিরুডুনাথকরপ্রিয়ঃ ।। ৭১ ।।
উন্নতানন উত্তুন্গ উদারস্ত্রিদশাগ্রণীঃ ।
ঊর্জস্বানূষ্মলমদ ঊহাপোহদুরাসদঃ ।। ৭২ ।।
ঋগ্যজুঃসামনয়ন ঋদ্ধিসিদ্ধিসমর্পকঃ ।
ঋজুচিত্তৈকসুলভো ঋণত্রয়বিমোচনঃ ।। ৭৩ ।।
লুপ্তবিঘ্নঃ স্বভক্তানাং লুপ্তশক্তিঃ সুরদ্বিষাম ।
লুপ্তশ্রীর্বিমুখার্চানাং লূতাবিস্ফোটনাশনঃ ।। ৭৪ ।।
একারপীঠমধ্যস্থ একপাদকৃতাসনঃ ।
এজিতাখিলদৈত্যশ্রীরেধিতাখিলসংশ্রয়ঃ ।। ৭৫ ।।
ঐশ্বর্যনিধিরৈশ্বর্যমৈহিকামুষ্মিকপ্রদঃ ।
ঐরংমদসমোন্মেষ ঐরাবতসমাননঃ ।। ৭৬ ।।
ওংকারবাচ্য ওংকার ওজস্বানোষধীপতিঃ ।
ঔদার্যনিধিরৌদ্ধত্যধৈর্য ঔন্নত্যনিঃসমঃ ।। ৭৭ ।।
অন্কুশঃ সুরনাগানামন্কুশাকারসংস্থিতঃ ।
অঃ সমস্তবিসর্গান্তপদেষু পরিকীর্তিতঃ ।। ৭৮ ।।
কমণ্ডলুধরঃ কল্পঃ কপর্দী কলভাননঃ ।
কর্মসাক্ষী কর্মকর্তা কর্মাকর্মফলপ্রদঃ ।। ৭৯ ।।
কদম্বগোলকাকারঃ কূষ্মাণ্ডগণনায়কঃ ।
কারুণ্যদেহঃ কপিলঃ কথকঃ কটিসূত্রভৃত ।। ৮০ ।।
খর্বঃ খড্গপ্রিয়ঃ খড্গঃ খান্তান্তঃস্থঃ খনির্মলঃ ।
খল্বাটশৃন্গনিলয়ঃ খট্বান্গী খদুরাসদঃ ।। ৮১ ।।
গুণাঢ্যো গহনো গদ্যো গদ্যপদ্যসুধার্ণবঃ ।

গদ্যগানপ্রিয়ো গর্জো গীতগীর্বাণপূর্বজঃ ।। ৮২ ।।
গুহ্যাচাররতো গুহ্যো গুহ্যাগমনিরূপিতঃ ।
গুহাশয়ো গুডাব্ধিস্থো গুরুগম্যো গুরুর্গুরুঃ ।। ৮৩ ।।
ঘন্টাঘর্ঘরিকামালী ঘটকুম্ভো ঘটোদরঃ ।
নকারবাচ্যো নাকারো নকারাকারশুণ্ডভৃত ।। ৮৪ ।।
চণ্ডশ্চণ্ডেশ্বরশ্চণ্ডী চণ্ডেশশ্চণ্ডবিক্রমঃ ।
চরাচরপিতা চিন্তামণিশ্চর্বণলালসঃ ।। ৮৫ ।।
ছন্দশ্ছন্দোদ্ভবশ্ছন্দো দুর্লক্ষ্যশ্ছন্দবিগ্রহঃ ।
জগদ্যোনির্জগত্সাক্ষী জগদীশো জগন্ময়ঃ ।। ৮৬ ।।
জপ্যো জপপরো জাপ্যো জিহ্বাসিংহাসনপ্রভুঃ ।
স্রবদ্গণ্ডোল্লসদ্ধানঝন্কারিভ্রমরাকুলঃ ।। ৮৭ ।।
টন্কারস্ফারসংরাবষ্টন্কারমণিনূপুরঃ ।
ঠদ্বয়ীপল্লবান্তস্থসর্বমন্ত্রেষু সিদ্ধিদঃ ।। ৮৮ ।।
ডিণ্ডিমুণ্ডো ডাকিনীশো ডামরো ডিণ্ডিমপ্রিয়ঃ ।
ঢক্কানিনাদমুদিতো ঢৌন্কো ঢুণ্ঢিবিনায়কঃ ।। ৮৯ ।।
তত্বানাং প্রকৃতিস্তত্বং তত্বংপদনিরূপিতঃ ।
তারকান্তরসংস্থানস্তারকস্তারকান্তকঃ ।। ৯০ ।।
স্থাণুঃ স্থাণুপ্রিয়ঃ স্থাতা স্থাবরং জন্গমং জগত ।
দক্ষয়্গ্নয়প্রমথনো দাতা দানং দমো দয়া ।। ৯১ ।।
দয়াবান্দিব্যবিভবো দণ্ডভৃদ্দণ্ডনায়কঃ ।
দন্তপ্রভিন্নাভ্রমালো দৈত্যবারণদারণঃ ।। ৯২ ।।
দংষ্ট্রালগ্নদ্বীপঘটো দেবার্থনৃগজাকৃতিঃ ।
ধনং ধনপতের্বন্ধুর্ধনদো ধরণীধরঃ ।। ৯৩ ।।
ধ্যানৈকপ্রকটো ধ্যেয়ো ধ্যানং ধ্যানপরায়ণঃ ।
ধ্বনিপ্রকৃতিচীত্কারো ব্রহ্মাণ্ডাবলিমেখলঃ ।। ৯৪ ।।

নন্দ্যো নন্দিপ্রিয়ো নাদো নাদমধ্যপ্রতিষ্ঠিতঃ ।
নিষ্কলো নির্মলো নিত্যো নিত্যানিত্যো নিরাময়ঃ ।। ৯৫ ।।
পরং ব্যোম পরং ধাম পরমাত্মা পরং পদম ।। ৯৬ ।।
পরাত্পরঃ পশুপতিঃ পশুপাশবিমোচনঃ ।
পূর্ণানন্দঃ পরানন্দঃ পুরাণপুরুষোত্তমঃ ।। ৯৭ ।।
পদ্মপ্রসন্নবদনঃ প্রণতাজ্ঞাননাশনঃ ।
প্রমাণপ্রত্যয়াতীতঃ প্রণতার্তিনিবারণঃ ।। ৯৮ ।।
ফণিহস্তঃ ফণিপতিঃ ফূত্কারঃ ফণিতপ্রিয়ঃ ।
বাণার্চিতাঙ্ঘ্রিযুগলো বালকেলিকুতূহলী ।
ব্রহ্ম ব্রহ্মার্চিতপদো ব্রহ্মচারী বৃহস্পতিঃ ।। ৯৯ ।।
বৃহত্তমো ব্রহ্মপরো ব্রহ্মণ্যো ব্রহ্মবিত্প্রিয়ঃ ।
বৃহন্নাদাগ্র্যচীত্কারো ব্রহ্মাণ্ডাবলিমেখলঃ ।। ১০০ ।।
ভ্রূক্ষেপদত্তলক্ষ্মীকো ভর্গো ভদ্রো ভয়াপহঃ ।
ভগবান ভক্তিসুলভো ভূতিদো ভূতিভূষণঃ ।। ১০১ ।।
ভব্যো ভূতালয়ো ভোগদাতা ভ্রূমধ্যগোচরঃ ।
মন্ত্রো মন্ত্রপতির্মন্ত্রী মদমত্তো মনো ময়ঃ ।। ১০২ ।।
মেখলাহীশ্বরো মন্দগতির্মন্দনিভেক্ষণঃ ।
মহাবলো মহাবীর্যো মহাপ্রাণো মহামনাঃ ।। ১০৩ ।।
যজ্ঞো যজ্ঞপতির্যজ্ঞগোপ্তা যজ্ঞফলপ্রদঃ ।
যশস্করো যোগগম্যো যাজ্ঞিকো যাজকপ্রিয়ঃ ।। ১০৪ ।।
রসো রসপ্রিয়ো রস্যো রঞ্জকো রাবণার্চিতঃ ।
রাজ্যরক্ষাকরো রত্নগর্ভো রাজ্যসুখপ্রদঃ ।। ১০৫ ।।
লক্ষো লক্ষপতির্লক্ষ্যো লয়স্থো লড্ডুকপ্রিয়ঃ ।
লাসপ্রিয়ো লাস্যপরো লাভকৃল্লোকবিশ্রুতঃ ।। ১০৬ ।।
বরেণ্যো বহ্নিবদনো বন্দ্যো বেদান্তগোচরঃ ।

www.yousigma.com

বিকর্তা বিশ্বতশ্চক্ষুর্বিধাতা বিশ্বতোমুখঃ ।। ১০৭ ।।
বামদেবো বিশ্বনেতা বজ্রিবজ্রনিবারণঃ ।
বিবস্বদ্বন্ধনো বিশ্বাধারো বিশ্বেশ্বরো বিভুঃ ।। ১০৮ ।।
শব্দব্রহ্ম শমপ্রাপ্যঃ শম্ভুশক্তিগণেশ্বরঃ ।
শাস্তা শিখাগ্রনিলয়ঃ শরণ্যঃ শম্বরেশ্বরঃ ।। ১০৯ ।।
ষড়্তুকুসুমস্রগ্বী ষডাধারঃ ষডক্ষরঃ ।
সংসারবৈদ্যঃ সর্বজ্ঞঃ সর্বভেষজভেষজম ।। ১১০ ।।
সৃষ্টিস্থিতিলয়ক্রীডঃ সুরকুন্জরভেদকঃ ।
সিন্দূরিতমহাকুম্ভঃ সদসদ্ভক্তিদায়কঃ ।। ১১১ ।।
সাক্ষী সমুদ্রমথনঃ স্বয়ংবেদ্যঃ স্বদক্ষিণঃ ।
স্বতন্ত্রঃ সত্যসংকল্পঃ সামগানরতঃ সুখী ।। ১১২ ।।
হংসো হস্তিপিশাচীশো হবনং হব্যকব্যভুক ।
হব্যং হুতপ্রিয়ো হৃষ্টো হৃল্লেখামন্ত্রমধ্যগঃ ।। ১১৩ ।।
ক্ষেত্রাধিপঃ ক্ষমাভর্তা ক্ষমাক্ষমপরায়ণঃ ।
ক্ষিপ্রক্ষেমকরঃ ক্ষেমানন্দঃ ক্ষোণীসুরদ্রুমঃ ।। ১১৪ ।।
ধর্মপ্রদোর্থদঃ কামদাতা সৌভাগ্যবর্ধনঃ ।
বিদ্যাপ্রদো বিভবদো ভুক্তিমুক্তিফলপ্রদঃ ।। ১১৫ ।।
আভিরূপ্যকরো বীরশ্রীপ্রদো বিজয়প্রদঃ ।
সর্ববশ্যকরো গর্ভদোষহা পুত্রপৌত্রদঃ ।। ১১৬ ।।
মেধাদঃ কীর্তিদঃ শোকহারী দৌর্ভাগ্যনাশনঃ ।
প্রতিবাদিমুখস্তম্ভো রুষ্টচিত্তপ্রসাদনঃ ।। ১১৭ ।।
পরাভিচারশমনো দুঃখহা বন্ধমোক্ষদঃ ।
লবস্ত্রুটিঃ কলা কাষ্ঠা নিমেষস্তত্পরক্ষণঃ ।। ১১৮ ।।
ঘটী মুহূর্তঃ প্রহরো দিবা নক্তমহর্নিশম ।
পক্ষো মাসর্ত্ব্যয়নাব্দযুগং কল্পো মহালয়ঃ ।। ১১৯ ।।

রাশিস্তারা তিথির্যোগো বারঃ করণমংশকম ।
লগ্নং হোরা কালচক্রং মেরুঃ সপ্তর্ষয়ো ধ্রুবঃ ।। ১২০ ।।
রাহুর্মন্দঃ কবির্জীবো বুধো ভৌমঃ শশী রবিঃ ।
কালঃ সৃষ্টিঃ স্থিতির্বিশ্বং স্থাবরং জন্গমং জগত ।। ১২১ ।।
ভূরাপোগ্নির্মরুদ্ব্যোমাহংকৃতিঃ প্রকৃতিঃ পুমান ।
ব্রহ্মা বিষ্ণুঃ শিবো রুদ্র ঈশঃ শক্তিঃ সদাশিবঃ ।। ১২২ ।।
ত্রিদশাঃ পিতরঃ সিদ্ধা যক্ষা রক্ষাংসি কিন্নরাঃ ।
সিদ্ধবিদ্যাধরা ভূতা মনুষ্যাঃ পশবঃ খগাঃ ।। ১২৩ ।।
সমুদ্রাঃ সরিতঃ শৈলা ভূতং ভব্যং ভবোদ্ভবঃ ।
সাংখ্যং পাতন্জলং যোগং পুরাণানি শ্রুতিঃ স্মৃতিঃ ।। ১২৪ ।।
বেদান্গানি সদাচারো মীমাংসা ন্যায়বিস্তরঃ ।
আয়ুর্বেদো ধনুর্বেদো গান্ধর্বং কাব্যনাটকম ।। ১২৫ ।।
বৈখানসং ভাগবতং মানুষং পান্চরাত্রকম ।
শৈবং পাশুপতং কালামুখংভৈরবশাসনম ।। ১২৬ ।।
শাক্তং বৈনায়কং সৌরং জৈনমার্হতসংহিতা ।
সদসদ্ব্যক্তমব্যক্তং সচেতনমচেতনম ।। ১২৭ ।।
বন্ধো মোক্ষঃ সুখং ভোগো যোগঃ সত্যমণুর্মহান ।
স্বস্তি হুংফট স্বধা স্বাহা শ্রৌষট বৌষট বষণ নমঃ ১২৮ ।।
গ্নয়ানং বিগ্নয়ানমানন্দো বোধঃ সংবিত্সমোসমঃ ।
এক একাক্ষরাধার একাক্ষরপরায়ণঃ ।। ১২৯ ।।
একাগ্রধীরেকবীর একোনেকস্বরূপধৃক ।
দ্বিরূপো দ্বিভুজো দ্ব্যক্ষো দ্বিরদো দ্বীপরক্ষকঃ ।। ১৩০ ।।
দ্বৈমাতুরো দ্বিবদনো দ্বন্দ্বহীনো দ্বয়াতিগঃ ।
ত্রিধামা ত্রিকরস্ত্রেতা ত্রিবর্গফলদায়কঃ ।। ১৩১ ।।
ত্রিগুণাত্মা ত্রিলোকাদিস্ত্রিশক্তীশস্ত্রিলোচনঃ ।

চতুর্বিধবচোবৃত্তিপরিবৃত্তিপ্রবর্তকঃ ।। ১৩২ ।।
চতুর্বাহুশ্চতুর্দন্তশ্চতুরাত্মা চতুর্ভুজঃ ।
চতুর্বিধোপায়ময়শ্চতুর্বর্ণাশ্রমাশ্রয়ঃ ১৩৩ ।।
চতুর্থীপূজনপ্রীতশ্চতুর্থীতিথিসম্ভবঃ ।।
পন্চাক্ষরাত্মা পন্চাত্মা পন্চাস্যঃ পন্চকৃত্তমঃ ।। ১৩৪ ।।
পন্চাধারঃ পন্চবর্ণঃ পন্চাক্ষরপরায়ণঃ ।
পন্চতালঃ পন্চকরঃ পন্চপ্রণবমাতৃকঃ ।। ১৩৫ ।।
পন্চব্রহ্মময়স্ফূর্তিঃ পন্চাবরণবারিতঃ ।
পন্চভক্ষপ্রিয়ঃ পন্চবাণঃ পন্চশিখাত্মকঃ ।। ১৩৬ ।।
ষট্কোণপীঠঃ ষট্চক্রধামা ষড্গ্রন্থিভেদকঃ ।
ষডন্গধ্বান্তবিধ্বংসী ষডন্গুলমহাহ্রদঃ ।। ১৩৭ ।।
ষণ্মুখঃ ষণ্মুখভ্রাতা ষট্শক্তিপরিবারিতঃ ।
ষড্বৈরিবর্গবিধ্বংসী ষডূর্মিভয়ভন্জনঃ ।। ১৩৮ ।।
ষট্তর্কদূরঃ ষট্কর্মা ষড্গুণঃ ষড্রসাশ্রয়ঃ ।
সপ্তপাতালচরণঃ সপ্তদ্বীপোরুমণ্ডলঃ ।। ১৩৯ ।।
সপ্তস্বর্লোকমুকুটঃ সপ্তসপ্তিবরপ্রদঃ ।
সপ্তান্গরাজ্যসুখদঃ সপ্তর্ষিগণবন্দিতঃ ।। ১৪০ ।।
সপ্তচ্ছন্দোনিধিঃ সপ্তহোত্রঃ সপ্তস্বরাশ্রয়ঃ ।
সপ্তাব্ধিকেলিকাসারঃ সপ্তমাতৃনিষেবিতঃ ।। ১৪১ ।।
সপ্তচ্ছন্দো মোদমদঃ সপ্তচ্ছন্দো মখপ্রভুঃ ।
অষ্টমূর্তির্ধ্যেয়মূর্তিরষ্টপ্রকৃতিকারণম ।। ১৪২ ।।
অষ্টান্গযোগফলভৃদষ্টপত্রাম্বুজাসনঃ ।
অষ্টশক্তিসমানশ্রীরষ্টৈশ্বর্যপ্রবর্ধনঃ ।। ১৪৩ ।।
অষ্টপীঠোপপীঠশ্রীরষ্টমাতৃসমাবৃতঃ ।
অষ্টভৈরবসেব্যোষ্টবসুবন্দ্যোষ্টমূর্তিভৃত ।। ১৪৪ ।।

www.yousigma.com

অষ্টচক্রস্ফুরন্মূর্তিরষ্টদ্রব্যহবিঃপ্রিয়ঃ ।
অষ্টশ্রীরষ্টসামশ্রীরষ্টৈশ্বর্যপ্রদায়কঃ ।
নবনাগাসনাধ্যাসী নবনিধ্যনুশাসিতঃ ।। ১৪৫ ।।
নবদ্বারপুরাবৃত্তো নবদ্বারনিকেতনঃ ।
নবনাথমহানাথো নবনাগবিভূষিতঃ ।। ১৪৬ ।।
নবনারায়ণস্তুল্যো নবদুর্গানিষেবিতঃ ।
নবরত্নবিচিত্রাঙ্গো নবশক্তিশিরোদ্ধৃতঃ ।। ১৪৭ ।।
দশাত্মকো দশভুজো দশদিক্পতিবন্দিতঃ ।
দশাধ্যায়ো দশপ্রাণো দশেন্দ্রিয়নিয়ামকঃ ।। ১৪৮ ।।
দশাক্ষরমহামন্ত্রো দশাশাব্যাপিবিগ্রহঃ ।
একাদশমহারুদ্রৈঃস্তুতশ্চৈকাদশাক্ষরঃ ।। ১৪৯ ।।
দ্বাদশদ্বিদশাষ্টাদিদোর্দণ্ডাস্ত্রনিকেতনঃ ।
ত্রয়োদশভিদাভিন্নো বিশ্বেদেবাধিদৈবতম ।। ১৫০ ।।
চতুর্দশেন্দ্রবরদশ্চতুর্দশমনুপ্রভুঃ ।
চতুর্দশাদ্যবিদ্যাঢ্যশ্চতুর্দশজগত্পতিঃ ।। ১৫১ ।।
সামপন্চদশঃ পন্চদশীশীতাংশুনির্মলঃ ।
তিথিপন্চদশাকারস্তিথ্যা পন্চদশার্চিতঃ ।। ১৫২ ।।
ষোডশাধারনিলয়ঃ ষোডশস্বরমাতৃকঃ ।
ষোডশান্তপদাবাসঃ ষোডশেন্দুকলাত্মকঃ ।। ১৫৩ ।।
কলাসপ্তদশী সপ্তদশসপ্তদশাক্ষরঃ ।
অষ্টাদশদ্বীপপতিরষ্টাদশপুরাণকৃত ।। ১৫৪ ।।
অষ্টাদশৌষধীসৃষ্টিরষ্টাদশবিধিঃ স্মৃতঃ ।
অষ্টাদশলিপিব্যষ্টিসমষ্টিজ্ঞ্নয়ানকোবিদঃ ।। ১৫৫ ।।
অষ্টাদশান্নসম্পত্তিরষ্টাদশবিজাতিকৃত ।
একবিংশঃ পুমানেকবিংশত্যন্গুলিপল্লবঃ ।। ১৫৬ ।।

চতুর্বিংশতিতত্ত্বাত্মা পন্চবিংশাখ্যপূরুষঃ ।
সপ্তবিংশতিতারেশঃ সপ্তবিংশতিয়োগকৃত ।। ১৫৭ ।।
দ্বাত্রিংশদ্ভৈরবাধীশশ্চতুস্ত্রিংশন্মহাহ্রদঃ ।
ষটিত্রংশত্তত্ত্বসংভূতিরষ্টত্রিংশত্কলাত্মকঃ ।। ১৫৮ ।।
পন্চাশদ্বিষ্ণুশক্তীশঃ পন্চাশন্মাতৃকালয়ঃ ।
দ্বিপন্চাশদ্বপুঃশ্রেণীত্রিষষ্টয়ক্ষরসংশ্রয়ঃ ।
পন্চাশদক্ষরশ্রেণীপন্চাশদ্রুদ্রবিগ্রহঃ ।। ১৫৯ ।।
চতুঃষষ্টিমহাসিদ্ধিয়োগিনীবৃন্দবন্দিতঃ ।
নমদেকোনপন্চাশন্মরুদ্বর্গনিরর্গলঃ ।। ১৬০ ।।
চতুঃষষ্টয়র্থনির্ণেতা চতুঃষষ্টিকলানিধিঃ ।
অষ্টষষ্টিমহাতীর্থক্ষেত্রভৈরববন্দিতঃ ।। ১৬১ ।।
চতুর্নবতিমন্ত্রাত্মা ষণ্ণবত্যধিকপ্রভুঃ ।
শতানন্দঃ শতধৃতিঃ শতপত্রায়তেক্ষণঃ ।। ১৬২ ।।
শতানীকঃ শতমখঃ শতধারাবরায়ুধঃ ।
সহস্রপত্রনিলয়ঃ সহস্রফণিভূষণঃ ।। ১৬৩ ।।
সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষঃ সহস্রপাত ।
সহস্রনামসংস্তুত্যঃ সহস্রাক্ষবলাপহঃ ।। ১৬৪ ।।
দশসাহস্রফণিভৃত্ফণিরাজকৃতাসনঃ ।
অষ্টাশীতিসহস্রাদ্যমহর্ষিস্তোত্রপাঠিতঃ ।। ১৬৫ ।।
লক্ষাধারঃ প্রিয়াধারো লক্ষাধারমনোময়ঃ ।
চতুর্লক্ষজপপ্রীতশ্চতুর্লক্ষপ্রকাশকঃ ।। ১৬৬ ।।
চতুরশীতিলক্ষাণাং জীবানাং দেহসংস্থিতঃ ।
কোটিসূর্যপ্রতীকাশঃ কোটিচন্দ্রাংশুনির্মলঃ ।। ১৬৭ ।।
শিবোদ্ভবাদ্যষ্টকোটিবৈনায়কধুরন্ধরঃ ।
সপ্তকোটিমহামন্ত্রমন্ত্রিতাবয়বদ্যুতিঃ ।। ১৬৮ ।।

ত্রয়স্ত্রিংশত্কোটিসুরশ্রেণীপ্রণতপাদুকঃ ।
অনন্তদেবতাসেব্যো হ্যনন্তশুভদায়কঃ ।। ১৬৯ ।।
অনন্তনামানন্তশ্রীরনন্তোনন্তসৌখ্যদঃ ।
অনন্তশক্তিসহিতো হ্যনন্তমুনিসংস্তুতঃ ।। ১৭০ ।।
ইতি বৈনায়কং নাম্নাং সহস্রমিদমীরিতম ।
ইদং ব্রাহ্মে মুহূর্তে যঃ পঠতি প্রত্যহং নরঃ ।। ১৭১ ।।
করস্থং তস্য সকলমৈহিকামুষ্মিকং সুখম ।
আয়ুরারোগ্যমৈশ্বর্যং ধৈর্যং শৌর্যং বলং যশঃ ।। ১৭২ ।।
মেধা প্রজ্ঞা ধৃতিঃ কান্তিঃ সৌভাগ্যমভিরূপতা ।
সত্যং দয়া ক্ষমা শান্তির্দাক্ষিণ্যং ধর্মশীলতা ।। ১৭৩ ।।
জগত্সংবননং বিশ্বসংবাদো বেদপাটবম ।
সভাপাণ্ডিত্যমৌদার্যং গাম্ভীর্যং ব্রহ্মবর্চসম ।। ১৭৪ ।।
ওজস্তেজঃ কুলং শীলং প্রতাপো বীর্যমার্যতা ।
জ্ঞানং বিজ্ঞানমাস্তিক্যং স্থৈর্যং বিশ্বাসতা তথা ।। ১৭৫ ।।
ধনধান্যাদিবৃদ্ধিশ্চ সকৃদস্য জপাদ্ভবেত ।
বশ্যং চতুর্বিধং বিশ্বং জপাদস্য প্রজায়তে ।। ১৭৬ ।।
রাজ্ঞো রাজকলত্রস্য রাজপুত্রস্য মন্ত্রিণঃ ।
জপ্যতে যস্য বশ্যার্থে স দাসস্তস্য জায়তে ।। ১৭৭ ।।
ধর্মার্থকামমোক্ষাণামনায়াসেন সাধনম ।
শাকিনীডাকিনীরক্ষোযক্ষগ্রহভয়াপহম ।। ১৭৮ ।।
সাম্রাজ্যসুখদং সর্বসপত্নমদমর্দনম ।
সমস্তকলহধ্বংসি দগ্ধবীজপ্ররোহণম ।। ১৭৯ ।।
দুঃস্বপ্নশমনং ক্রুদ্ধস্বামিচিত্তপ্রসাদনম ।
ষড্বর্গাষ্টমহাসিদ্ধিত্রিকালজ্ঞানকারণম ।। ১৮০ ।।
পরকৃত্যপ্রশমনং পরচক্রপ্রমর্দনম ।

সংগ্রামমার্গে সবেষামিদমেকং জয়াবহম ।। ১৮১ ।।
সর্ববন্ধ্যত্বদোষঘ্নং গর্ভরক্ষৈককারণম ।
পঠ্যতে প্রত্যহং যত্র স্তোত্রং গণপতেরিদম ।। ১৮২ ।।
দেশে তত্র ন দুর্ভিক্ষমীতয়ো দুরিতানি চ ।
ন তদ্গেহং জহাতি শ্রীর্যত্রায়ং জপ্যতে স্তবঃ ।। ১৮৩ ।।
ক্ষয়কুষ্ঠপ্রমেহার্শভগন্দরবিষূচিকাঃ ।
গুল্মং প্লীহানমশমানমতিসারং মহোদরম ।। ১৮৪ ।।
কাসং শ্বাসমুদাবর্তং শূলং শোফাময়োদরম ।
শিরোরোগং বমিং হিক্কাং গণ্ডমালামরোচকম ।। ১৮৫ ।।
বাতপিত্তকফদ্বন্দ্বত্রিদোষজনিতজ্বরম ।
আগন্তুবিষমং শীতমুষ্ণং চৈকাহিকাদিকম ।। ১৮৬ ।।
ইত্যাদ্যুক্তমনুক্তং বা রোগদোষাদিসম্ভবম ।
সর্বং প্রশময়ত্যাশু স্তোত্রস্যাস্য সকৃজ্জপঃ ।। ১৮৭ ।।
প্রাপ্যতেস্য জপাত্সিদ্ধিঃ স্ত্রীশূদ্রৈঃ পতিতৈরপি ।
সহস্রনামমন্ত্রোয়ং জপিতব্যঃ শুভাপ্তয়ে ।। ১৮৮ ।।
মহাগণপতেঃ স্তোত্রং সকামঃ প্রজপন্নিদম ।
ইচ্ছয়া সকলান ভোগানুপভুজ্যেহ পার্থিবান ।। ১৮৯ ।।
মনোরথফলৈর্দিব্যৈর্ব্যোময়ানৈর্মনোরমৈঃ ।
চন্দ্রেন্দ্রভাস্করোপেন্দ্রব্রহ্মশর্বাদিসদ্মসু ।। ১৯০ ।।
কামরূপঃ কামগতিঃ কামদঃ কামদেশ্বরঃ ।
ভুক্ত্বা যথেপ্সিতান্ভোগানভীষ্টৈঃ সহ বন্ধুভিঃ ।। ১৯১ ।।
গণেশানুচরো ভূত্বা গণো গণপতিপ্রিয়ঃ ।
নন্দীশ্বরাদিসানন্দৈর্নন্দিতঃ সকলৈর্গণৈঃ ।। ১৯২ ।।
শিবাভ্যাং কৃপয়া পুত্রনির্বিশেষং চ লালিতঃ ।
শিবভক্তঃ পূর্ণকামো গণেশ্বরবরাত্পুনঃ ।। ১৯৩ ।।

www.yousigma.com

জাতিস্মরো ধর্মপরঃ সার্বভৌমোভিজায়তে ।
নিষ্কামস্তু জপন্নিত্যং ভক্ত্যা বিঘ্নেশতত্পরঃ ।। ১৯৪ ।।
য়োগসিদ্ধিং পরাং প্রাপ্য জ্ঞানবৈরাগ্যসংয়ুতঃ ।
নিরন্তরে নিরাবাধে পরমানন্দসংজ্ঞিয়তে ।। ১৯৫ ।।
বিশ্বোত্তীর্ণে পরে পূর্ণে পুনরাবৃত্তিবর্জিতে ।
লীনো বৈনায়কে ধাম্নি রমতে নিত্যনির্বৃতে ।। ১৯৬ ।।
য়ো নামভির্হুতৈর্দত্তৈঃ পূজয়েদর্চয়েএন্নরঃ ।
রাজানো বশ্যতাং য়ান্তি রিপবো য়ান্তি দাসতাম ।। ১৯৭ ।।
তস্য সিধ্যন্তি মন্ত্রাণাং দুর্লভাশ্চেষ্টসিদ্ধয়ঃ ।
মূলমন্ত্রাদপি স্তোত্রমিদং প্রিয়তমং মম ।। ১৯৮ ।।
নভস্যে মাসি শুক্লায়াং চতুর্থ্যাং মম জন্মনি ।
দূর্বাভির্নামভিঃ পূজাং তর্পণং বিধিবচ্চরেত ।। ১৯৯ ।।
অষ্টদ্রব্যৈর্বিশেষেণ কুর্যাদ্ভক্তিসুসংয়ুতঃ ।
তস্যেপ্সিতং ধনং ধান্যমৈশ্বর্যং বিজয়ো য়শঃ ।। ২০০ ।।
ভবিষ্যতি ন সন্দেহঃ পুত্রপৌত্রাদিকং সুখম ।
ইদং প্রজপিতং স্তোত্রং পঠিতং শ্রাবিতং শ্রুতম ।। ২০১ ।।
ব্যাকৃতং চর্চিতং ধ্যাতং বিমৃষ্টমভিবন্দিতম ।
ইহামুত্র চ বিশ্বেষাং বিশ্বৈশ্বর্যপ্রদায়কম ।। ২০২ ।।
স্বচ্ছন্দচারিণাপ্যেষ য়েন সন্ধার্যতে স্তবঃ ।
স রক্ষ্যতে শিবোদ্ভূতৈর্গণৈরধ্যষ্টকোটিভিঃ ।। ২০৩ ।।
লিখিতং পুস্তকস্তোত্রং মন্ত্রভূতং প্রপূজয়েত ।
তত্র সর্বোত্তমা লক্ষ্মীঃ সন্নিধত্তে নিরন্তরম ।। ২০৪ ।।
দানৈরশেষৈরখিলৈর্ব্রতৈশ্চ তীর্থৈরশেষৈরখিলৈর্মখৈশ্চ ।
ন তত্ফলং বিন্দতি য়দ্গণেশসহস্রনামস্মরণেন সদ্যঃ ।। ২০৫ ।।
এতন্নাম্নাং সহস্রং পঠতি দিনমণৌ প্রত্যহংপ্রোজ্জিহানে

সায়ং মধ্যন্দিনে বা ত্রিষবণমথবা সন্ততং বা জনো য়ঃ ।
স স্যাদৈশ্বর্যধুর্যঃ প্রভবতি বচসাং কীর্তিমুচ্চৈস্তনোতি
দারিদ্র্যং হন্তি বিশ্বং বশয়তি সুচিরং বর্ধতে পুত্রপৌত্রৈঃ ।। ২০৬ ।।
অকিন্চনোপ্যেকচিত্তো নিয়তো নিয়তাসনঃ ।
প্রজপংশ্চতুরো মাসান গণেশার্চনতত্পরঃ ।। ২০৭ ।।
দরিদ্রতাং সমুন্মূল্য় সপ্তজন্মানুগামপি ।
লভতে মহতীং লক্ষ্মীমিত্যাগ্ন্যা পারমেশ্বরী ।। ২০৮ ।।
আয়ুষ্যং বীতরোগং কুলমতিবিমলং সম্পদশ্চার্তিনাশঃ
কীর্তির্নিত্যাবদাতা ভবতি খলু নবা কান্তিরব্যাজভব্যা ।
পুত্রাঃ সন্তঃ কলত্রং গুণবদভিমতং য়দ্যদন্যচ্চ তত্ত -
ন্নিত্যং য়ঃ স্তোত্রমেতত পঠতি গণপতেস্তস্য় হস্তে সমস্তম ।। ২০৯ ।।
গণন্জয়ো গণপতির্হেরম্বো ধরণীধরঃ ।
মহাগণপতির্বুদ্ধিপ্রিয়ঃ ক্ষিপ্রপ্রসাদনঃ ।। ২১০ ।।
অমোঘসিদ্ধিরমৃতমন্ত্রশ্চিন্তামণির্নিধিঃ ।
সুমন্গলো বীজমাশাপূরকো বরদঃ কলঃ ।। ২১১ ।।
কাশ্য়পো নন্দনো বাচাসিদ্ধো ঢুন্ঢির্বিনায়কঃ ।
মোদকৈরেভিরত্রৈকবিংশত্য়া নামভিঃ পুমান ।। ২১২ ।।
উপায়নং দদেদ্ভক্ত্য়া মত্প্রসাদং চিকীর্ষতি ।
বত্সরং বিঘ্নরাজোস্য় তথ্যমিষ্টার্থসিদ্ধয়ে ।। ২১৩ ।।
য়ঃ স্তৌতি মদ্গতমনা মমারাধনতত্পরঃ ।
স্তুতো নাম্না সহস্রেণ তেনাহং নাত্র সংশয়ঃ ।। ২১৪ ।।
নমো নমঃ সুরবরপূজিতান্ঘ্রয়ে
নমো নমো নিরুপমমন্গলাত্মনে ।
নমো নমো বিপুলদয়ৈকসিদ্ধয়ে
নমো নমঃ করিকলভাননায় তে ।। ২১৫ ।।

কিন্কিণীগণরচিতচরণঃ
প্রকটিতগুরুমিতচারুকরণঃ ।
মদজললহরীকলিতকপোলঃ
শময়তু দুরিতং গণপতিনাম্না ।। ২১৬ ।।
।। ইতি শ্রীগণেশপুরাণে উপাসনাখণ্ডে ঈশ্বরগণেশসংবাদে গণেশসহস্রনামস্তোত্রং নাম ষট্চত্বারিংশোধ্যায়ঃ ।।

www.yousigma.com